# Shri Paramadhava Stuti

# શ્રીપરમાધવસ્તુતિઃ

## Document Information

Text title : Shri Paramadhava Stuti 03 07

File name : paramAdhavastutiH.itx

Category : vishhnu, stuti

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 03-07

Latest update : August 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીપરમાધવસ્તુતિઃ

શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥ ૧॥

શ્રીમત્યાશ્રિતસન્તાનઃ શ્રીશૈલાગ્રે કૃતાલયઃ ।
કરોતુ કમલાકાન્તઃ કામિતં નઃ ફલં મહત્ ॥ ૨॥

રમારમણ વાઞ્છિતં વિતર દાસદાસાય મે
રસારમણિભાલભૂતિલકિતાહિશૈલાલય ।
કુચેલમિવ ગોપિકાવશગજાનકીનાથ ભો
વિભીષણમિવાવ માં વિહિતભક્તિપૂર્તિં વિભો ॥ ૩॥

યદમ્બુકણિકાશ્રિતાઃ પ્રતિદશં મરુત્પોતકા-
શ્ચલન્ત ઇહ ચઙ્ક્રમાદ્યલસચેતસઃ પ્રાણિનઃ ।
પુનન્તિ પુરુષોત્તમામ્બુરુહિણી મનોહારિણી
પુનર્જનિભયં ત્વિયં હરતુ મે સકૃન્મજ્જનાત્ ॥ ૪॥

નમજ્જનતમશ્છટાકબલનૈકબદ્ધાદરં
નભોમણિમિવાપરં નક્સરોજિનીસેવિતમ્ ।
નમામ્યહમમું મુહુર્નભસિ રોચમાનં સદા
નગેન્દ્રમુરગાધિપાભિધમુદૂઢનારાયણમ્ ॥ ૫॥

પ્રપત્તિફલકારણં પ્રણમદાર્તિવિદ્રાવણં
ફણીન્દ્રગિરિભૂષણં ભગવદઙ્ઘ્રિયુગ્માર્પિતમ્ ।
યદેતદહમિન્દિરાકુચતટદ્વયીલાઞ્છનં
યદેવ નિખિલત્રયીશિખરલાલ્યમદ્યાશ્રયે ॥ ૬॥

વિરિઞ્ચભવદેવરાડિહિતનિત્યપૂજોજ્જ્વલં
વિયત્સરિદુપાહૃતૈર્વિમલતોયપદ્મોત્પલૈઃ ।
વિધૂતશકટાસુરં વિહિતગૌતમસ્ત્રીસુખં

વિભોઃ પદયુગાર્પણં વિજયતે ફણીન્દ્રાચલે ॥ ૭॥

વિધૂતવિનતાપદં વિબુધવૃન્દવન્ધં સદા
વિનૌમિ વિનતાસુતં વિહગરાજમેનં વિભુમ્ ।
ય એત્ય યુધિ રાવણિપ્રહિતઘોરનાગાસ્ત્રતો
રરક્ષ સહવાનરૈર્ઝટિતિ સાનુજં રાઘવમ્ ॥ ૮॥

યથા હરિપદાવનીયુગમવર્ણયત્તત્વત-
સ્ત્રયીશિખરદેશિકઃ કિલ સહસ્રધા યત્પુરા ।
તથૈવ બહુધા તનું દધદિવાત્ર નાનાકૃતે
ર્વિભાતિ જગદીશિતુશ્ચરણરક્ષણૈકાદરમ્ ॥ ૨॥

ઇદં સરસિજા (લયા) કમનપાદરક્ષાદ્ધયી-
શતં હરતુ મે તમશ્શતસહસ્રજન્માર્જિતમ્ ।
યદાશ્રયતયા જગત્રિતયવિક્રમૈકક્ષમં
બભૂવ પરમાત્મનોઽપ્યનુપમસ્ય પાદામ્બુજમ્ ॥ ૧૦॥

સ્ફુરત્કનકભિત્તિકાઘટિતચિત્રરત્નપ્રભા-
પરીતમિદમિન્દિરારમણમન્દિરં રાજતે ।
યદીયમિહ દર્શનં ભવતિ મુક્તિદં દેહિનાં
વિના ઝટિતિ સત્ક્રિયાં જનનચક્રમાસેદુષામ્ ॥ ૧૧॥

નમસ્તસ્મૈ યસ્મિન્ વસતિ પરમાત્મા સ ભગવાન્
રમાભૂનીલાભિઃ સહ વિહૃતિલોલાભિરતુલઃ ।
વિમાનં રત્નાઢ્યં જગતિ યદહીન્દ્રક્ષિતિભૃતઃ
શિરોરત્નં વિષ્વક્ સ્ફુરતિ મહદાનન્દનિલયમ્ ॥ ૧૨॥

ઇદં નમોઽસ્મદ્ગુરવે ચ તસ્મૈ
ભૂયસ્તદાચાર્યપરમ્પરાભ્યઃ ।
ત્રય્યન્તગુર્વાદિયતીશ્વરશ્રી-
શઠારિસેનેશરમાધિપેભ્યઃ ॥ ૧૩॥

વન્દે મન્દારમાલાધરમિહ મહસાં વૃન્દમિન્દીવરાભં
વન્દ્યં વન્દારુકાણામનવધિકદયાનન્દકન્દં મુકુન્દમ્ ।
નાના ત્વામ્નાયવેદ્યં વિલસતિ ફણિરાડ્ભૂભૃદગ્રે રમાભૂ-
નીલાલીલાનુકૂલં વિમલતરમિદં વિશ્વરક્ષાધુરીણમ્ ॥ ૧૪॥

વાઞ્છાધિકં પ્રણમતાં ફલમત્ર દાતું
    વાતન્ધયાદ્રિશિખરે વસતો મુરારેઃ ।
પાદદ્વયં પરિસરાનમતો મમેદ-
    મુત્તંસપલ્લવરુચિં વિદધાતુ મૌલૌ ॥ ૧૫॥

ઉપનતહરચૂડાચન્દ્રલેખાભિમુક્તા-
    મૃતસુરુચિરબિન્દુશ્રેણિકેવેયમાશુ ।
વિદલિતનવમુક્તાજાલગૌરા મુરારે-
    શ્ચરણનખરરેખા શાશ્વની નઃ પુનાતુ ॥ ૧૬॥

પાદાભિવન્દનકૃતે પરમાત્મનો નુ
    શ્રીનાથપાદકટકાકૃતિમભ્યુપેત્ય ।
સંલક્ષ્યતે કિમયમદ્ય સ ચિત્રભાનુ-
    ર્નો ચેત્ કુતોઽસ્ય વિભુવિષ્ણુપદોપસેવા ॥ ૧૭॥

જઙ્ઘાદ્વયી જગદધીશિતુરસ્ય રમ્યા
    જેતુઃ સ્મરસ્ય જયકાહલિકાયુગીવ ।
આભાતિ ચારુમણિનૂપુરકાન્તિચિત્રા
    યસ્યાં મનાંસિ યમિનાં સતતં રમન્તે ॥ ૧૮॥

વૃત્તા વિચિત્રવસુધારમણીનિજાઙ્ગ-
    લાવણ્યદર્શનલસન્મણિદર્પણશ્રીઃ ।
અદ્યૈવ મે મહદઘૌઘતમિસ્રમેષા
    વિશ્વેશજાનુયુગલી શિથિલીકરોતુ ॥ ૧૯॥

સૌન્દર્યસમ્પદુદયાકુલપારિજાતૌ
    સંવીતપીતવસનૌ સદૃશાવિમૌ તૌ ।
નીલારમાવસુમતીનિયતોપધાને
    નેતુઃ શ્રિયઃ શ્રયતુ મે મતિરૂરુકાણ્ડૌ ॥ ૨૦॥

આબદ્ધપીતવસના નવરત્નકાઞ્ચી-
    સંવેષ્ટિતા કટિતટી કમલાધિપસ્ય ।
પર્યન્તહાટકમહીચ લસદ્વિચિત્ર-
    રત્નદ્યુતિઃ સ્ફુરતિ સેયમિહાઞ્જનાદ્રેઃ ॥ ૨૧॥

રમ્યા રમારમણનાભિરસૌ ગભીરા
    રાજીવજન્મજનની જગતાં વિધાત્રી ।

તદ્દેહકાન્તિયમુનાસરિતોઽદ્ભુતશ્રી-
    રાવર્તવિભ્રમમિતો વિદધાતિ નૂનમ્ ॥ ૨૨॥

વક્ષઃસ્થલીવિહરદમ્બુધિકન્યકાયા
    હસ્તોચ્ચલત્કમલરેણુકરમ્બિતેન ।
લિપ્તં વિભાતિ વપુરસ્ય સુચન્દનેન
    બાલાતપારુણમિવાગ્રતદં મહાદ્રેઃ ॥ ૨૩॥

આનીલભાસુરવિશાલભુજાન્તરાલ-
    વ્યોમસ્ફુરત્પૃથુલમૌક્તિકહારનદ્યાઃ ।
હેમાબ્જપઙ્ક્તિરિવ કૌસ્તુભકાન્તિરેખા
    શ્રીવત્સદીધિતિચલન્મધુપાલિરસ્ય ॥ ૨૪॥

શઙ્ખં શશાઙ્કધવલાઙ્ગમસૌ દધાનો
    વામે સદા કરતલે વરદાનહેસ્તઃ ।
સંલક્ષ્યતે ખલુ લસન્નિજકન્ધરસ્ય
    સાચં પરીક્ષિતુમિવાસ્ય ચ કણ્ઠદધ્નમ્ ॥ ૨૫॥

હસ્તામ્બુજેન વિધૃતં વિમલં રથાઙ્ગ-
    માલોક્યતે જલધિજાધિપતેરમુષ્ય ।
યદ્દક્ષિણેન નવનીરદનીલકાન્તે-
    રર્કસ્ય મણ્ડલમિવોદયશૈલમૂર્ધ્ના ॥ ૨૬॥

કસ્તૂરિકાકલિતચારુકલઙ્કભાજો
    મન્દસ્મિતદ્યુતિભરાકુલચન્દ્રિકસ્ય ।
ચન્દ્રસ્ય ચાસ્યમુખચન્દ્રમસઃ કલાભિઃ
    પૂર્ણસ્ય કઃ સતતમત્ર વદેત સામ્યમ્ ॥ ૨૭॥

આલોમનીલકુટિલાલકજાલનૂત્ન
    જીમૂતપઙ્ક્તિપરિવેષ્ટિતમૂલભાગઃ ।
સંલક્ષ્યતે મુરરિપોર્મણિમૌલિરેષ
    ભાસ્વત્કરાક્રમિતમૂર્તિરિવાદ્રિરાજઃ ॥ ૨૮॥

તત્તાદૃક્ધૃતશાર્ઙ્ગચાપરુચિરો વક્ષઃસ્થલક્ષ્મીતટિ-
    ત્કારુણ્યામૃતવૃષ્ટિરદ્ભુતદરધ્વાનાતિભીમારવઃ ।
મુક્તાહારબલાકસન્તતિયુતો મૂર્ધ્નગ્જનક્ષ્માભૃતઃ
    પુણ્યશ્રીર્વનમાલયા વિજયતે શ્રોવિષ્ણુકાલામ્બુદઃ ॥ ૨૯॥

હસ્તોદઞ્ચિતશઙ્ખચક્રરુચિભિઃ સર્વાઃ સમુદ્ભાસયન્
આશાસ્તાદૃગનર્ઘ્યરત્નરુચિતૈરાકલ્પિતો ભૂષણૈઃ ।
અગ્રે કાઞ્ચનમૌલિકુણ્ડલલસત્કેયૂરહારાદિભિ-
ર્ભાતિ શ્રીગિરિનાયકઃ સહ મયા પૂર્ણેન્દુબિમ્બાનનઃ ॥ ૩૦॥

તં વન્દે તપનીયચેલમનઘં તારાધિપાર્કેક્ષણં
તારાજાલવિશુદ્ભમૌક્તિકલસન્માલાભિરામોરસમ્ ।
શ્રુત્યન્તપ્રતિપાદ્યનૈજચરિતઃ શ્રીમાન્ દયાવારિધિઃ
શ્રીશૈલાગ્રનિકેતનઃ શ્રિતપરિત્રાતેતિ યો વિશ્રુતઃ ॥ ૩૧॥

શ્રીમન્મીનશરીર મામવ મહાકૂર્માઙ્ગ કોલાકૃતે ।
પાહિ શ્રીનરસિંહ વામનતનો વિષ્ણો દયાવારિધે ।
ભાસ્વદ્ભાર્ગવરામ રાઘવ કૃપામૂર્તે હલિન્ માધવ
શ્રીકૃષ્ણાખિલલોકનાથ સહસા કલ્કિન્ મુરારે વિભો ॥ ૩૨॥

ત્રાહિ ત્રાહિ દયાનિધે ઝટિતિ માં દારિદ્ર્યનક્રાનના-
દન્તસ્તીવ્રઋણાખ્યદન્તનિકરૈરાપીડિતાઙ્ગં સદા ।
પદ્માકામુક પાદયોનિપતિતં પદ્માક્ષ તે ત્વં જવા-
ન્નો ચેત્ કા ગતિરત્ર મે ત્રિજગતાં મધ્યે ત્વદન્યા વિભો ॥ ૩૩॥

નક્રગ્રસ્તપદઃ સ નાથ કરિગડાક્રુશ્ય મૂલેતિ ન
ત્રાતઃ કિં ભવતા ત્રિલોકપતિના તૂર્ણં સમાગચ્છતા ।
હા કૃષ્ણેત્યવમાનિતામપિ પરૈરને કુરૂણાં મુહુઃ
ક્રોશન્તીં સહસા રરક્ષ ભુવિ કઃ કૃષ્ણાં ત્વદન્યસ્તુ તામ્ ॥ ૩૪॥

ખ્યાતિઃ ખલ્વિહ પર્યપાલય ઇતિ હિ ત્વં રામમૂર્તિઃ પુરા
શ્રીમન્ વાલિનિરસ્તમાત્મસચિવૈરન્યં વનાન્તં ગતમ્ ।
દીનં દીનશરણ્ય સાધુ સહસા સુગ્રીવમાશ્વાસ્ય તં
રાજ્યસ્થં કલયન્નિહત્ય તદરિં ચાત્માર્થસિદ્ધિચ્છલાત્ ॥ ૩૫॥

એવમ્પ્રાયા મહાત્મન્નિરવધિકદયાસિન્ધુના બન્ધુના ન
ત્રાતા ભીતા જગત્યાં કતિ કતિ વિવિધોપદ્રવાદ્દેહભાજઃ ।
લોકસ્યાસ્ય ત્વયા શ્રીરમણ તદહમપ્યેક એવાદ્ય તેષાં
ક્ષિપ્રં સંરક્ષ પાપાદનિતરશરણં મામિમં ત્વત્કટાક્ષૈઃ ॥ ૩૬॥

વિસ્મૃત્યાસ્મત્કૃતાનિ પ્રતિજનનમસત્કૃત્યજાલાન્યમેયા-

ન્યદ્ય ત્વન્દીનબન્ધો સકૃદપિ રચિતામાનતિં વા સ્તુતિં વા ।
વ્યાજીકૃત્ય પ્રસન્નો યદિ મયિ કૃપયા વર્તસે તત્તવ સ્યા-
ધ્યુક્તં ખલ્વન્યથા ચેદનવધિકદયાપારવશ્યસ્ય નૈવ ॥ ૩૭॥

સદ્યઃ પ્રસીદ જગદીશ યથા ભવેયં
દારિદ્ર્યદુઃખઋણસઙ્કટતો વિમુક્તઃ ।
શ્રીમન્નથ પ્રણતરક્ષક માં પ્રપન્નં
સંયોજયસ્વ સમયે ભવદઙ્ઘ્રિ (કા)ભ્યામ્ ॥ ૩૮॥

રમાકાન્ત સ્વાન્તં રઘુવર નિતાન્તં મદવશાત્
પરિભ્રાન્તં પાપોન્મુખમનિશમુન્મત્તચરિતમ્ ।
નિગૃહ્યૈતત્ ક્ષિપ્રં નિરવધિદયાબ્ધે મમ ભવ-
ત્પદામ્ભોજદ્વન્દ્વે કલય ચિરલીલાપરવશમ્ ॥ ૩૯॥

સ્વધામ્નો વૈકુણ્ઠાદપિ વરમિદં પન્નગગિરેઃ
શિરસ્તુઙ્ગં શ્રીમન્નિતિ યદવતીર્ણોઽસિ રમયા ।
સુયુક્તં તત્તસ્માદપિ ગતવતો ધન્વિનગારં
હરે કો વા લાભસ્તવ કથય ગોદાલયમિદમ્ ॥ ૪૦॥

તતઃ શ્રીવૈકુણ્ઠાદપિ સુભગમિત્યેતદધુના
મૃષા શેષક્ષોણીધરશિખરમભ્યેત્ય વસસિ ।
યદેતત્ કિન્તુ શ્રીરમણ કરુણાસાર ભગવન્
મુદા ગોદાપાણિગ્રહણકરણાયૈવ નિયતમ્ ॥ ૪૧॥

વન્દે તમિન્દિરાકાન્તં મન્દેતરકૃપારસમ્ ।
ઇન્દીવરદલશ્યામમિન્દુબિમ્બસદૃઙ્મુખમ્ ॥ ૪૨॥

વેદં ચ શાસ્ત્રમનવદ્યમધીશ લક્ષ્મ્યાઃ
સત્યં કુરુષ્વ ભવ સત્યવચોઽગ્રણીસ્ત્વમ્ ।
દત્ત્વા ક્ષણેન મદભીપ્સિતમદ્ય શેષ-
ક્ષોણીભૃદીશ વિનતં કુરુ માં કૃતાર્થમ્ ॥ ૪૩॥

ગ્રામારામક્ષિતિધનપશુવ્રાતભૂષાસુભૃત્ય-
સ્થાનીયાદ્યૈરિહ બહુવિધૈઃ સાધનૈશ્ચાનપેક્ષમ્ ।
ભૂયો નિત્યં જયતિ મહદારાધનં યસ્ય શેષ-
ક્ષોણીભર્તુઃ શિરસિ વસતઃ શ્રીધરં તં પ્રપદ્યે ॥ ૪૪॥

તસ્માદદ્યૈવ લક્ષ્મીપરિબૃઢ સહસા દુઃસહાં દુર્દશાં મે
    છિત્ત્વૈમા વેઙ્કટક્ષ્માધરનિલય હરે પૂર્વપાપોપલબ્ધામ્ ।
દત્ત્વા મદ્વાઞ્છિતાર્થં સકલમપિ બલાદૈહિકામુષ્મિકાખ્યં
    ભક્તિં પાદાબ્જયોસ્તે ભવદુરિતગતિધ્વંસિનીં રક્ષ માં ત્વમ્ ॥ ૪૫॥

ઇતિ તાતયાર્યકવિના વિનિર્મિતા
    મિતબુદ્ધિનાપિ કૃપયા મુરદ્વિષઃ ।
પઠતામભીષ્ટફલદા સતામિયં
    મુદમાતનોતુ પરમાધવસ્તુતિઃ ॥ ૪૬॥

ઇતિ શ્રીપરમાધવસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Rajesh Thyagarajan

*Shri Paramadhava Stuti*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*